# In Praise of Vishnu in His Ten Incarnations

# દશાવતારસ્તુતી

## Document Information

Text title : In Praise of Vishnu in His Ten Incarnations

File name : dashavatarastuti.itx

Category : vishhnu, dashAvatAra, stotra, vAdirAja, vishnu

Location : doc_vishhnu

Author : Sri Vadiraja Tiirtha

Transliterated by : Anand Ravipati <aravipati at dvaita.net>

Proofread by : Meera Tadipatri <mtadipatri at dvaita.net>, Shrisha Rao <shrao at dvaita.org>

Latest update : July 14, 2000

Send corrections to : sanskrit at cheerful dot c om,info@dvaita.net,aravipati@dvaita.net

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# દશાવતારસ્તુતી

પ્રોષ્ઠીશવિગ્રહ સુનિષ્ઠીવનોદ્ધત વિશિષ્ટામ્બુચારિજલધે ।
કોષ્ઠાન્તરાહિતવિચેષ્ટાગમૌઘ પરમેષ્ઠીડિત ત્વમવમામ્ ।
પ્રેષ્ઠાર્કસૂનુમનુચેષ્ઠાર્થમાત્મવિદતીષ્ટો યુગાન્તસમયે ।
સ્થેષ્ઠાત્મશૃઙ્ગધૃતકાષ્ઠામ્બુવાહન વરાષ્ટાપદપ્રભતનો ॥ ૧॥

ખણ્ડીભવદ્બહુળડિણ્ડીરજૃમ્ભણ સુચણ્ડી કૃતો દધિ મહા ।
કાણ્ડાતિ ચિત્ર ગતિ શૌણ્ડાદ્ય હૈમરદ ભાણ્ડા પ્રમેય ચરિત ।
ચણ્ડાશ્વકણ્ઠમદ શુણ્ડાલ દુર્હૃદય ગણ્ડા ભિખણ્ડાકર દો-
શ્ચણ્ડા મરેશહય તુણ્ડાકૃતે દૃશમખણ્ડામલં પ્રદિશ મે ॥ ૨॥

કૂર્માકૃતે ત્વવતુ નર્માત્મ પૃષ્ઠધૃત ભર્માત્મ મન્દર ગિરે ।
ધર્માવલમ્બન સુધર્માસદાકલિતશર્મા સુધાવિતરણાત્ ।
દુર્માન રાહુમુખ દુર્માયિ દાનવસુમર્માભિભેદન પટો ।
ધર્માર્ક કાન્તિ વર વર્મા ભવાન્ ભુવન નિર્માણ ધૂત વિકૃતિઃ ॥ ૩॥

ધન્વન્તરેઽઙ્ગરુચિ ધન્વન્તરેઽરિતરુ ધન્વન્સ્તરીભવસુધા-
ભાન્વન્તરાવસથ મન્વન્તરાધિકૃત તન્વન્તરૌષધનિધે ।
દન્વન્તરઙ્ગશુગુદન્વન્તમાજિષુ વિતન્વન્મમાબ્ધિ તનયા ।
સૂન્વન્તકાત્મહૃદતન્વરાવયવ તન્વન્તરાર્તિજલધૌ ॥ ૪॥

યા ક્ષીરવાર્ધિમથનાક્ષીણદર્પદિતિજાક્ષોભિતામરગણા-
પેક્ષાપ્તયેઽજનિ વલક્ષાંષુબિમ્બજિદતીક્ષ્ણાલકાવૃતમુખી ।
સૂક્ષ્માવલગ્નવસનાક્ષેપકૃત્કુચ કટાક્ષાક્ષમીકૃતમનો-
દીક્ષાસુરાહૃતસુધાક્ષાણિનોઽવતુસુ રૂક્ષેક્ષણાદ્ધરિતનુઃ ॥ ૫॥

શિક્ષાદિયુઙ્નિગમ દીક્ષાસુલક્ષણ પરિક્ષાક્ષમાવિધિસતી ।
દાક્ષાયણી ક્ષમતિ સાક્ષાદ્રમાપિનય દાક્ષેપવીક્ષણવિધૌ ।
પ્રેક્ષાક્ષિલોભકરલાક્ષાર સોક્ષિત પદાક્ષેપલક્ષિતધરા ।
સાઽક્ષારિતાત્મતનુ ભૂક્ષારકારિનિટિલાક્ષાક્ષમાનવતુ નઃ ॥ ૬॥

નીલામ્બુદાભશુભ શીલાદ્રિદેહધર ખેલાધૃતોધધિધુની-
શૈલાદિયુક્ત નિખિલેલા કટાદ્યસુર તૂલાટવીદહન તે ।
કોલાકૃતે જલધિ કાલાચલાવયવ નીલાબ્જદંષ્ટ્ર ધરણી-
લીલાસ્પદોરુતર મૂલાશિયોગિવર જાલાભિવન્દિત નમઃ ॥ ૭॥

દમ્ભોલિતીક્ષ્ણનખ સમ્ભેદિતેન્દ્રરિપુ કુમ્ભીન્દ્ર પાહિ કૃપયા ।
સ્તમ્ભાર્ભ કાસહનડિમ્ભાય દત્તવર ગમ્ભીરનાદ નૃહરે ।
અંભોધિજાનુસરણાંભોજભૂપવનકુમ્ભીનસેશખગરાટ્ ।
કુમ્ભીન્દ્રકૃત્તિધર જમ્ભારિષણ્મુખમુખાંભોરુહાભિનુત મામ્ ॥ ૮॥

પિઙ્ગાક્ષ વિક્રમ તુરઙ્ગાદિ સૈન્ય ચતુરઙ્ગા વલિપ્ત દનુજા-
સાઙ્ગાધ્વરસ્થ બલિ સાઙ્ગાવપાત હૃષિતાઙ્ગા મરાલિનુત તે ।
શૃઙ્ગારપાદનખ તુઙ્ગાગ્રભિન્ન કન કાઙ્ગાણ્ડપત્તિતટિની-
તુઙ્ગાતિ મઙ્ગલ તરઙ્ગાભિભૂત ભજ કાઙ્ગાઘ વામન નમઃ ॥ ૯॥

ધ્યાનાર્હ વામનતનોનાથ પાહિ યજમાના સુરેશવસુધા-
દાનાય યાચનિક લીનાર્થવાગ્વશિતનાનાસદસ્યદનુજ ।
મીનાઙ્કનિર્મલનિશાનાથકોટિલસમાનાત્મ મૌઞ્જિગુણ કૌ-
પીનાચ્છસૂત્રપદયાનાતપત્રકરકાનમ્યદણ્ડવરભૃત્ ॥ ૧૦॥

ધૈર્યામ્બુધે પરશુચર્યાધિકૃત્તખલવર્યાવનીશ્વર મહા-
શૌર્યાભિભૂત કૃતવીર્યાત્મજાતભુજવીર્યાવલેપનિકર ।
ભાર્યાપરાધકુપિતાર્યાજ્ઞયાગલિતનાર્યાત્મસૂગલતરો ।
કાર્યાપરાધમવિચાર્યાર્યમૌઘજયિવીર્યામિતા મયિ દયા ॥ ૧૧॥

શ્રીરામલક્ષ્મણશુકારામ ભૂરવતુગૌરામલામિતમહો-
હારામરસ્તુત યશોરામકાન્તિસુત નોરામનોરથહર ।
સ્વારામવર્યરિપુ વીરામયાર્ધિકર ચીરામલાવૃતકટે ।
સ્વારામ દર્શનજમારામયાગતસુઘોરામનોરમલબ્ધકલહ ॥ ૧૨॥

શ્રીકેશવપ્રદિશનાકેશ જાતકપિલોકેશ ભગ્નરવિભૂ-
તોકેતરાર્તિહરણાકેવલાર્તસુખધીકેકિકાલજલદ ।
સાકેતનાથવરપાકેરમુખ્યસુત કોકેન ભક્તિમતુલામ્ ।
રાકેન્દુ બિમ્બમુખ કાકેક્ષણાપહ હૃશીકેશ તેઽઙ્ઘ્રિકમલે ॥ ૧૩॥

રામે નૃણાં હૃદભિરામેનરાશિકુલભીમે મનોઽદ્યરમતામ્ ।

ગોમેદિનીજયિતપોઽમેયગાધિસુતકામેનિવિષ્ટ મનસિ ।
શ્યામે સદા ત્વયિ જિતામેયતાપસજરામે ગતાધિકસમે ।
ભીમેશચાપદલનામેયશૌર્યજિતવામેક્ષણે વિજયિનિ ॥ ૧૪॥

કાન્તારગેહખલકાન્તારટદ્ધદન કાન્તાલકાન્તકશરમ્ ।
કાન્તારયામ્બુજનિકાન્તાન્વવાયવિધુકાન્તાશ્મભાદિપહરે ।
કાન્તાલિલોલદલકાન્તાભિશોભિતિલકાન્તાભવન્તમનુસા ।
કાન્તાનુયાનજિત કાન્તારદુર્ગકટકાન્તા રમાત્વવતુ મામ્ ॥ ૧૫॥

દાન્તં દશાનનસુતાન્તં ધરામધિવસન્તં પ્રચણ્ડતપસા ।
ક્લાન્તં સમેત્ય વિપિનાન્તં ત્વવાપ યમનન્તં તપસ્વિપટલમ્ ।
યાન્તં ભવારતિભયાન્તં મમાશુ ભગવન્તં ભરેણ ભજતાત્ ।
સ્વાન્તં સવારિદનુજાન્તં ધરાધરનિશાન્તં સ તાપસવરમ્ ॥ ૧૬॥

શમ્પાભચાપલવકંપાસ્તશત્રુબલસમ્પાદિતામિતયશાઃ ।
શં પાદતામરસસમ્પાતિનોઽલમનુકમ્પારસેન દિશ મે ।
સમ્પાતિપક્ષિસહજં પાપિરાવણહતં પાવનં યદકૃથાઃ ।
ત્વં પાપકૂપપતિતં પાહિ માં તદપિ પમ્પાસરસ્તટચર ॥ ૧૭॥

લોલાક્ષ્યપેક્ષિતસુલીલાકુરઙ્ગવધખેલાકુતૂહલગતે ।
સ્વાલાપભૂમિજનિબાલાપહાર્યનુજપાલાદ્ય ભો જયજય ।
બાલાગ્નિદગ્ધપુરશાલાનિલાત્મજનિફાલાત્તપત્તલરજો ।
નીલાઙ્ગદાદિકપિમાલાકૃતાલિપથમૂલાભ્યતીતજલધે ॥ ૧૮॥

તૂણીરકાર્મુક કૃપાણીકિણાઙ્કભુજપાણીરવિપ્રતિમભાઃ ।
ક્ષોણિધરાલિનિભઘોણીમુખાદિઘનવેણીસુરક્ષણકરઃ ।
શોણિભવન્નયન કોણીજિતામ્બુનિધિપાણીરિતાર્હણમણિ-
શ્રેણીવૃતાઙ્ઘ્રિરિહ વાણીશસૂનુવરવાણીસ્તુતો વિજયતે ॥ ૧૯॥

હુઙ્કારપૂર્વમથ ટઙ્કારનાદમતિપઙ્કાવધાર્યચલિતા ।
લઙ્કાશિલોચ્ચયવિશઙ્કાપતદ્ભિદુર શઙ્કાઽઽસ યસ્ય ધનુષઃ ।
લઙ્કાધિપોઽમનુત યં કાલરાત્રિમિવ શઙ્કાશતાકુલધિયા ।
તં કાલદણ્ડશતસઙ્કાશકાર્મુકશરાઙ્કાન્વિતં ભજ હરિમ્ ॥ ૨૦॥

ધીમાનમેયતનુધામાર્તમઙ્ગળદનામા રમાકમલભૂ-
કામારિપન્નગપકામાહિવૈરિગુરુસોમાદિવન્દ્યમહિમા ।
સ્થેમાદિનાપગતસીમાવતાત્સખલસામાજરાવણરિપૂ ।

રામાભિદો હરિરભૌમાકૃતિઃ પ્રતનસામાદિવેદવિષયઃ ॥ ૨૧॥

દોષાત્મભૂવશતુરાષાડતિક્રમજદોષાત્મભર્તૃવચસા ।
પાષાણભૂતમુનિયોષાવરાત્મતનુવેષાદિદાયિચરણઃ ।
નૈષાદયોષિદશુભેષાકૃદણ્ડજનિદોષાચરાદિશુભદો ।
દોષાગ્રજન્મમૃતિશોષાપહોઽવતુ સુદોષાઙ્ઘ્રિજાતહનનાત્ ॥ ૨૨॥

વૃન્દાવનસ્થપશુવૃન્દાવનં વિનુતવૃન્દારકૈકશરણમ્ ।
નન્દાત્મજં નિહતનિન્દાકૃદાસુરજનં દામબદ્ધજઠરમ્ ।
વન્દામહે વયમમન્દાવદાતરુચિમાન્દાક્ષકારિવદનમ્ ।
કુન્દાલિદન્તમુત કન્દાસિતપ્રભતનું દાવરાક્ષસહરમ્ ॥ ૨૩॥

ગોપાલકોત્સવકૃતાપારભક્ષ્યરસસૂપાન્નલોપકુપિતા ।
શાપાલયાપિતલયાપામ્બુદાલિસલિલાપાયધારિતગિરે ।
સ્વાપાઙ્ગદર્શનજ તાપાઙ્ગરાગયુતગોપાઙ્ગનાંશુકહૃતિ-
વ્યાપારશૌણ્ડ વિવિધાપાયતસ્ત્વમવ ગોપારિજાતહરણ ॥ ૨૪॥

કંસાદિકાસદવતંસાવનીપતિવિહિંસાકૃતાત્મજનુષમ્ ।
સંસારભૂતમિહ સંસારબદ્ધમનસં સારચિત્સુખતનુમ્ ।
સંસાધયન્તમનિશં સાત્ત્વિકવ્રજમહં સાદરં બત ભજે ।
હંસાદિતાપસરિરંસાસ્પદં પરમહંસાદિવન્દ્યચરણમ્ ॥ ૨૫॥

રાજીવનેત્ર વિદુરાજીવ મામવતુ રાજીવકેતનવશમ્ ।
વાજીભપત્તિનૃપરાજીરથાન્વિતજરાજીવગર્વશમન ।
વાજીશવાહ સિતવાજીશ દૈત્યતનુવાજીશભેદકરદોઃ ।
જાજીકદમ્બનવરાજીવમુખ્યસુમરાજીસુવાસિતશિરઃ ॥ ૨૬॥

કાલીહૃદાવસથકાલીયકુણ્ડલિપકાલીસ્થપાદનખરા ।
વ્યાલીનવાંશુકરવાલીગણારુણિતકાલીરુચે જય જય ।
કેલીલવાપહૃતકાલીશદત્તવરનાલીકદૃપ્તદિતિભૂ-
ચૂલીકગોપમહિલાલીતનૂઘુસૃણધૂલીકણાઙ્કહૃદય ॥ ૨૭॥

કૃષ્ણાદિપાણ્ડુસુતકૃષ્ણામનઃપ્રચુરતૃષ્ણાસુતૃપ્તિક રવાક્ ।
કૃષ્ણાઙ્કપાલિરત કૃષ્ણાભિધાઘહર કૃષ્ણાદિષણ્મહિળ ભોઃ ।
પુષ્ણાતુ મામજિત નિષ્ણાતવાર્ધિમુદનુષ્ણાંશુમણ્ડલ હરે ।
જિષ્ણો ગિરીન્દ્રધર વિષ્ણો વૃષાવરજ ધૃષ્ણો ભવાન્કરુણયા ॥ ૨૮॥

રામાશિરોમણિધરામાસમેત બલરામાનુજાભિધ રતિમ્ ।
વ્યોમાસુરાન્તકર તે મારતાત દિશ મે માધવાઙ્ઘ્રિકમલે ।
કામાર્તભૌમપુરરામાવલીપ્રણયવામાક્ષિપીતતનુભા ।
ભીમાહિનાથમુખવૈમાનિકાભિનુત ભીમાભિવન્દ્યચરણ ॥ ૨૯॥

સક્ષ્વેળભક્ષ્યભયદાક્ષિશ્રવોગણજલાક્ષેપપાશયમનમ્ ।
લાક્ષાગૃહજ્વલનરક્ષોહિડિમ્બબકભૈક્ષાન્નપૂર્વવિપદઃ ।
અક્ષાનુબન્ધભવરૂક્ષાક્ષરશ્રવણસાક્ષાન્મહિષ્યવમતી ।
કક્ષાનુયાનમધમક્ષ્માપસેવનમભીક્ષ્ણાપહાસમસતામ્ ॥ ૩૦॥

ચક્ષાણ એવ નિજપક્ષાગ્રભૂદશશતાક્ષાત્મજાદિસુહૃદા-
માક્ષેપકારિકુનૃપાક્ષૌહિણીશતબલાક્ષોભદીક્ષિતમનાઃ ।
તાર્ક્ષ્યાસિચાપશરતીક્ષ્ણારિપૂર્વનિજલક્ષ્માણિ ચાપ્યગણયન્ ।
વૃક્ષાલયધ્વજરિરક્ષાકરો જયતિ લક્ષ્મીપતિર્યદુપતિઃ ॥ ૩૧॥

બુદ્ધાવતાર કવિબદ્ધાનુકમ્પ કુરુ બદ્ધાઞ્જલૌ મયિ દયામ્ ।
શૌદ્ધોદનિપ્રમુખસૈદ્ધાન્તિકાસુગમબૌદ્ધાગમપ્રણયન ।
ક્રુદ્ધાહિતાસુહૃતિસિદ્ધાસિખેટધર શુદ્ધાશ્વયાન કમલા ।
શુદ્ધાન્ત માં રુચિપિનદ્ધાખિલાઙ્ગ નિજમદ્ધાવ કલ્ક્યભિધ ભોઃ ॥ ૩૨॥

સારઙ્ગકૃત્તિધરસારઙ્ગવારિધર સારઙ્ગરાજવરદા-
સારં ગદારિતરસારં ગતાત્મમદસારં ગતૌષધબલમ્ ।
સારઙ્ગવત્કુસુમસારં ગતં ચ તવ સારઙ્ગમાઙ્ઘ્રિયુગલમ્ ।
સારઙ્ગવર્ણમપસારં ગતાબ્જમદસારં ગદિંસ્ત્વમવ મામ્ ॥ ૩૩॥

ગ્રીવાસ્યવાહતનુદેવાણ્ડજાદિદશભાવાભિરામચરિતમ્ ।
ભાવાતિભવ્યશુભધીવાદિરાજયતિભૂવાગ્વિલાસનિલયમ્ ।
શ્રીવાગધીશમુખદેવાભિનમ્યહરિસેવાર્ચનેષુ પઠતા-
માવાસ એવ ભવિતાવાગ્ભવેતરસુરાવાસલોકનિકરે ॥ ૩૪॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણ વિરચિતં

શ્રીદશાવતારસ્તુતિઃ સમ્પૂર્ણમ્

ભારતીરમણમુખ્યપ્રાણાન્તર્गત શ્રીકૃષ્ણાર્પણમસ્તુ

Encoded by Anand Ravipati

Proofread by Meera Tadipatri(mtadipatri@dvaita.net), Shrisha Rao (shrao@dvaita.org)

*In Praise of Vishnu in His Ten Incarnations*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*